# .. brahmasUtra ..

## ॥ ब्रह्मसूत्राणि ॥

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

ॐ अथातो ब्रह्मजिज्ञासा ॐ ।ॐ जन्माद्यस्य यतः ॐ ।
ॐ शास्त्रयोनित्त्वात् ॐ ।ॐ तत्तुसमन्वयात् ॐ ।
ॐ ईक्षतेर्नाशब्दं ॐ ।ॐ गौणश्चेन्नात्मशब्दात् ॐ ।
ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ।ॐ हेयवत्त्वावचनाच्च ॐ ।
ॐ स्वाव्ययात् ॐ ।ॐ गतिसामान्यात् ॐ ।
ॐ श्रुतत्त्वाच्च ॐ ।ॐ आनन्दमयोऽभ्यासात् ॐ ।
ॐ विकारशब्दान्नेतिचेन्न प्राचुर्यात् ॐ ।
ॐ तद्धेतुव्यपदेशाच्च ॐ ।ॐ मान्त्रवर्णीकमेव च गीयते ॐ ।
ॐ नेतरोऽनुपपत्तेः ॐ ।ॐ भेदव्यपदेशाच्च ॐ ।
ॐ कामाच्च नानुमानापेक्षा ॐ ।
ॐ अस्मिन्नस्य च तद्योगम् शास्ति ॐ ।
ॐ अंतस्तद् धर्मोपदेशात् ॐ ।ॐ भेदव्यपदेशच्चान्यः ॐ ।
ॐ आकाशस्तल्लिङ्गात् ॐ ।ॐ अत एव प्राणः ॐ ।
ॐ ज्योतिश्चरणाभिधानात् ॐ ।
ॐ छन्दोऽभिधानान्नेतिचेन्न तथाचेतोर्पणनिगदात्तथा हि दर्शनं ॐ ।
ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवं ॐ ।
ॐ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ॐ ।
ॐ प्राणस्तथानुगमात् ॐ ।
ॐ नवक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ॐ ।
ॐ शास्त्रदृष्ट्या तोपदेशो वामदेववत् ॐ ।
ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासत्र्ऽइविध्यादाश्रितत्त्वादिः तद्योगात् ॐ ।

॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
प्रथमाध्यायस्य प्रथमः पादः समाप्तः ॥
॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु ॥

Encoded and proofread by Shrisha Rao shrao at dvaita.org

Please send corrections to sanskrit@cheerful.com
Last updated November 19, 2010
http://sanskritdocuments.org